“विवक्षितामर्थविदस्तत्क्षणं प्रतिसंहृताम्” माघः ।

**अर्थविप्रकर्ष** पु० अर्थस्य अर्थबोधस्य विप्रकर्षः बोधनस्य विलम्बेनोत्पादनम् । पूर्व्वपूर्व्वमपेक्ष्य उत्तरोत्तरस्य विलम्बेनार्थबोधने “श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्” जै०सू० । तथाहि अनपेक्षरवरूपायाः द्वितीयादिश्रुतेः अर्थप्रकाशनसामर्थ्य-रूपलिङ्गापेक्षया शीघ्रार्थबोधकत्वम् इति तस्याः सर्व्वतः प्राबल्यम् एवं लिङ्गस्य वाक्याद्यपेक्षया शीघ्रार्थोपस्थापकतया बलवत्त्वम् । विवृतिः बलाबलाधिकरणशब्दे ।

**अर्थव्ययज्ञ** त्रि० अर्थस्य धनस्य व्ययं तत्प्रकारं जानाति ज्ञा–क । किं धनं, कथं, कुत्र, कियत्, कस्मै वा व्ययि-तव्यमिति विशेषाभिज्ञे ।

**अर्थव्यापाश्रय** पु० अर्थस्य प्रयोजनस्य व्यपाश्रयः । १प्रयो-जनसम्बन्धे २अभिधेयाश्रये । ब० । ३सप्रयोजने त्रि० ।

**अर्थशास्त्र** न० अर्थस्य भूमिधनादेः प्रापकं शास्त्रं शाक०त० । १नीतिशास्त्रे, अभिचारादिकर्म्मप्रतिपादके २शास्त्रे च । “अर्थशास्त्रात्तु बलवत् धर्म्मशास्त्रमिति स्थितिः” या०स्मृ० विवृतमेतन्मिताक्षरायाम् “यद्यपि समानकर्त्तृकतया अर्थशास्त्रधर्म्मशास्त्रयोः स्वरूपगतो विशेषोनास्ति तथापि प्रमेयस्य धर्म्मस्य प्राधान्यादर्थस्य चाप्राधान्याद्धर्म-शास्त्रं बलवदित्यभिप्रायः धर्मस्य च प्राधान्यं शास्त्रादौ दर्शितन्तस्माद्धर्मशास्त्रार्थशास्त्रयोर्विरोधे अर्थशास्त्रस्य बाध एव । ‘गुरुर्वा बालवृद्धौ वा ब्राह्मणं वा बहु-श्रुतम् । आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषोहन्तुर्भवति कश्चन । प्रच्छन्नं वा प्रकाशं वा मन्युस्तं मन्युमृच्छति” तथा “आततायिन मायान्तमपि वेदान्तगं रणे । जिघांसन्तञ्जिघांसीयान्न ते-न ब्रह्महा भवेत्” इत्याद्यर्थशास्त्रम् । ‘इयं विशुद्धिरुदिता प्रमाप्याकामतोद्विजम् सकामतो ब्रह्मबधे निष्कृतिर्न विधीयते” इत्यादि धर्म्मशास्त्रन्तयोर्विरोधे धर्म्मशास्त्रं बल-वदिति युक्त”मित्यन्यमतमुक्त्वा । “हिरण्यभूमिलाभेभ्योमि-त्रलब्धिर्वरा यतः । अतो यतेततत् प्राप्तौ” इत्यर्थ शास्त्रम् । “धर्म्मशास्त्रानुसारेण क्रोधलोभविवर्जितः” इति धर्म्मशास्त्रम् । तयोः क्वचिद्विषये विरोधो भवति यथा चतुष्पाद्व्यवहारे प्रवर्तमाने एकस्य जयेऽवधार्य्य-माणे धर्म्मानुसरणम् न मित्रलाभः । अन्यस्य तु जये मित्रलब्धिर्न धर्म्म-शास्त्रमनुसृतम्भवति तत्रार्थशास्त्रा-द्धर्मशास्त्रं बलवत् अतएव “धर्मार्थसन्निपाते अर्थग्राहिण एतदेवेति” प्रायश्चित्तस्य गुरुत्वन्दर्शितमापस्तंवेन” इति ।

**अर्थशौच** अर्थानां तदुपायानां शौचम् तदर्जने शुद्धिः । अन्यायेन धनोपार्ज्जनपरिहारेण अर्थार्ज्जनशुद्धौ “सर्व्वेषामेव शौचानामर्थशौचं परं स्मृतमिति” मनुः ।

**अर्थसंग्रह** पु० ६त० । धनसञ्चये ।

**अर्थसंस्थान** न० अर्थानां धनानां संस्थानं स्थितिर्यस्मात् सम्+स्था–अपादाने ल्युट् वा । १धनोपार्जनसाधन प्रतिग्रहादौ । २भावे ल्युट् ६त० । ३अर्थस्थितौ ।

**अर्थसञ्चय** पु० अर्थानां धनानां सञ्चयः संग्रहः समुदायश्च । १धनसंग्रहे । “कुदेशमासाद्य कुतोऽर्थ-सञ्चयः” इति नीति० । २धनसमूहे च ।

**अर्थसमाज** पु० अर्थानां कारणानां वा समाजः समूहः । १बहुविधार्थसमूहे २कारणसमूहे च । “अर्थसमाजग्रस्तत्वात् नीलघटत्वादिकम् न कस्यचित् कार्य्यतावच्छेदकमिति” गदा० । तथाहि घटत्वं दण्डादेः कार्य्यतावच्छेदकम् । नीलत्वन्तु नीलकपालस्येति भिन्नभिन्नकारणस्यैव तत्तत्कार्य्य-तावच्छेदकम् तथाच नीलघटत्वं न कस्याप्येकस्य कारणस्य कार्य्यतावच्छेदकम् नीलघटत्वस्य नाना कारणस्यैव कार्य्य-तावच्छेदकत्वात् एवञ्च तस्य कारणसमाजग्रस्तत्वात् न कस्यापि कार्य्यतावच्छेदकत्वम् । एवमन्यदप्युदाहार्य्यम् । ३धनसमूहे च ।

**अर्थसमाहार** पु० ६त० । १धनसंग्रहे सम्यगुपायेनार्ज्जने ते च उपायाः “सप्त वित्तागमा धर्म्म्या दायोलाभः क्रयोजयः । विभागः संप्रयोगश्च सत्प्रतिग्रहएव चेति” स्मृत्युक्ताः साधारणाः “ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोः गौ०उक्ताः “याजना-ध्यापनप्रतिग्रहैर्ब्राह्मणोधनमर्ज्जयेदितिस्मृत्युक्ताश्च ब्राह्मणादेः यथायथम् असाधारणाः ज्ञेयाः । २धनसमूहे च ।

**अर्थसम्बन्ध** पु० अर्थस्य धनस्य वाच्याद्यर्थस्य वा सम्बन्धः । १धनसम्बन्धे वाच्याद्यर्थसम्बन्धे । २ धनसम्बन्धप्रयोजकाश्च अपतितपुत्रत्वादयः शास्त्रीयाः क्रयादयश्च लौकिकाः ।

**अर्थसिद्ध** अर्थात् अर्थान्वयविशेषात् सिद्धः । शब्दादिनाऽबोध-नेऽपि अन्वयबललभ्ये पदार्थे” यथा घटमानयेति वाक्ये घटस्य छिद्रेतरत्वमन्वयबललभ्यं न च तत्र शब्दशक्त्याद्य-पेक्षा । तथा च शाब्दबोधे योग्यताज्ञानस्य हेतुतया छिद्रेत-रघटएव जलाहरणप्रयोजकत्वावधारणेन तत्रैव प्रवृत्तिर्न तरघटादौ एवमन्यत्रापि । अर्थः प्रयोजनं धनं वा सिद्धोऽस्य परनि० । २सिद्धार्थे सिद्धप्रयोजने ३स्वतः सिद्धधने च त्रि० ।